# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – २** | **गुणाः – ५०** |
| विषयः – स्वामिनारायणवेदान्तः (J) | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १४/०७/२०२१** | **सन्दर्भग्रन्थः – ब्रह्मसूत्रभाष्यरत्नम् ४ अध्यायः** | |

**सूचना -** **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १** **अधोलिखितेषु द्वयोः उत्तरं लिखत।**

१ 'आवृत्तिरसकृदुपदेशात्' इतीदं सूत्रं यथाग्रन्थं व्याख्यात।
२ 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' इतीदं सूत्रं ग्रन्थोक्तदिशा विवृणुत।
३ 'भोगेन त्वितरे क्षपयित्वाऽथ सम्पद्यते' इतीदं सूत्रं भाष्योक्तदिशा व्याकुरुत।
४ 'तदधिगम उत्तरपूर्वाघयोः अश्लेषविनाशौ तद्व्यपदेशात्' इतीदं सूत्रं भाष्यानुगुणं विमृशत।

**प्रश्नः २** भाष्योक्तदिशा आवृत्त्यधिकरणं व्याख्यात।

**प्रश्नः ३** ब्रह्मसूत्रभाष्यरत्नानुसारम् आसीनाधिकरण प्रपञ्चयत।

**प्रश्नः ४** ग्रन्थोक्तदिशा संसारव्यपदेशाधिकरणं स्पष्टयत।

**प्रश्नः ५** भोष्योक्तदिशा रश्म्यधिकरणं निरूपयत।

**प्रश्नः ६** **अधोलिखितेषु द्वयोः उत्तरं लिखत।**

१ 'आतिवाहिकास्तल्लिङ्गात्' इतीदं सूत्रं यथाभाष्यम् उपवर्णयत।
२ 'अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च' इतीदं सूत्रं ग्रन्थोक्तदिशा व्याख्यात।
३ भाष्यानुगुणं 'कार्यं बादरिरस्य गत्युपपत्तेः' इतीदं सूत्रं प्रतिपादयत।
४ भाष्योक्तदिशा अर्चिराद्यधिकरणं व्याख्यात।

**प्रश्नः ७** ग्रन्थोक्तदिशा आतिवाहिकाधिकरणं प्रपञ्चयत।

**प्रश्नः ८** भाष्योक्तदिशा कार्याधिकरणं निरूपयत ।

**प्रश्नः ९** भाष्योक्तदिशा सम्पद्याविर्भावाधिकरणम् उपवर्णयत ।

**प्रश्नः १०** भाष्योक्तदिशा जगद्व्यापारवर्जाधिकरणं विमृशत ।

**प्रश्नः ११** **दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ ब्रह्मसूत्रे कति अध्यायाः सन्ति ?
२ ब्रह्मसूत्रस्य चतुर्थाध्यायस्य नाम किम् ?
३ ब्रह्मसूत्रभाष्यरत्नस्य कर्ता कः ?
४ ब्रह्मसूत्रभाष्यरत्नस्य चतुर्थाध्याये कति अधिकरणानि सन्ति ?
५ चतुर्थाध्यायस्य प्रथमपादे किं प्रतिपाद्यते ?
६ मोक्षसाधनतया विहितं वेदनं किम् असकृत् आवर्तनीयम् उत न ?
७ उपासने दिगादिनियमः अस्ति उत न ?
८ चतुर्थाध्यायस्य द्वितीयपादे कति सूत्राणि सन्ति ?
९ वागादीनां मनसि किं स्वरूपलयः भवति उत वृत्तिलयः ?
१० 'आसृत्युपक्रमात्' इति शब्दस्य कोऽर्थः ?
११ ब्रह्मप्रापकत्वरूपेण का गतिः प्रसिद्धा ?
१२ 'आतिवाहिकाः' इति शब्देन के प्रोक्ताः ?
१३ ब्रह्मलोकशब्दः कुत्र उपपद्यते ?
१४ चतुर्थाध्यायस्य चतुर्थपादे किं निरूप्यते ?
१५ संसारे केषां पुनरावृत्तिः न भवति ?

****